# पंचायुध स्तोत्र

स्फुरत् सहस्रार शिखाति तीव्रं
सुदर्शनं भास्कर कोटि तुल्यम् ।
सुरद्विषां प्राण विनाशि विष्णोः
चक्रं सदाहं शरणं प्रपद्ये || १ ॥

विष्णो र्मुखोत्थानिल पूरितस्य
यस्य ध्वनि र्दानव दर्प हन्ता ।
तं पाञ्चजन्यं शशि कोटि शुभ्रं
शङ्खं सदाहं शरणं प्रपद्ये || २ ॥

हिरण्मयीं मेरु समान सारां
कौमोदकीं दैत्य कुलैक हन्त्रीम् ।
वैकुण्ठ वामाग्र कराभि मृष्टां
गदां सदाहं शरणं प्रपद्ये || ३ ॥

रक्षोऽसुराणां कठिनोग्र कण्ठ-
-च्छेदक्षर क्षोणित दिग्ध सारम् ।
तं नन्दकं नाम हरेः प्रदीप्तं
खड्गं सदाहं शरणं प्रपद्ये || ५ ॥

यज्ज्या निनाद श्रवणात् सुराणां
चेतांसि निर्मुक्त भयानि सद्यः ।

भवन्ति दैत्याशनि बाण वर्षैः
शार्ङ्गं सदाहं शरणं प्रपद्ये || ४ ॥

इमं हरेः पञ्च महायुधानां
स्तवं पठेद्योऽनुदिनं प्रभाते ।
समस्त दुःखानि भयानि सद्यः
पापानि नश्यन्ति सुखानि सन्ति || ६ ॥

वने रणे शत्रु जलाग्नि मध्ये
यदृच्छ यापत्सु महा भयेषु ।
इदं पठेत्विदं स्तोत्र मना कुलात्मा
सुखी भवेत्तत्कृत सर्वरक्षः || ७ ॥

इति पंचायुध स्तोत्रम् ॥